श्रीः

# श्रीशैल-ईच्चम्पाडि-गरुडपुरं रघुनन्दनाचार्य-मङ्गलम्

சோகத்தூர் தி.ந.ச. ஸ்ரீ உ.வே. Dr. ராமாநுஜாச்சார் ஸ்வாமி, பெங்களூரு

ओरत्तिनाम्नि सुग्रामे शुभे तुण्डीरमण्डले । सुदर्शनार्य-सीतांबा-सम्भूतायास्तु मङ्गलम् ॥ १ ॥

रघुनन्दननाम्ना यः प्रथितः पण्डितोत्तमः । शिष्यश्च तार्क्ष्यपूःस्वामिवर्याणां तस्य मङ्गलम् ॥ २ ॥

मधुरान्तकवास्तव्य-वीरराघवसूरिणः । शिष्याग्रगण्यचर्याय गुरुवर्याय मङ्गलम् ॥ ३ ॥

कौण्डिन्यान्वयसम्भूतः पर्याप्तिगुणभूषणः । स्थितप्रज्ञचरित्रश्च धीरो यस्तस्य मङ्गलम् ॥ ४ ॥

संस्कृते द्राविडे चैव पण्डितोऽध्यापकश्च यः । उपदेशमुखैः शिष्यान् उद्धर्त्रे तस्य मङ्गलम् ॥ ५ ॥

श्रद्धया मेधया चापि तालपत्रस्थमातृकाः । शास्त्रीयाः शोधयित्रे च बुधवर्याय मङ्गलम् ॥ ६ ॥

श्रीरङ्गक्षेत्रवासेन भगवत्सेवया मुदा । गुरुशुश्रूषया नित्यं कालं नेत्रेऽस्तु मङ्गलम् ॥ ७ ॥

कावेरीस्नानतृप्ताय कल्याणचरिताय च । सन्ततीरपि सन्मार्गे स्थापकायास्तु मङ्गलम् ॥ ८ ॥

वेदान्तद्वयनिष्णात-वेदमार्गानुसारकैः । वैदिकोत्तमपुत्रैश्च सेवितायास्तु मङ्गलम् ॥ ९ ॥

अहोबिलमठे ख्यात-वेदमौळियतीश्वरे । वेदान्तचिन्तनार्थं यः सदा रक्तोऽस्य मङ्गलम् ॥ १० ॥

पुत्रवन्मयि वात्सल्यं दर्शितं येन धीमता । श्वशुरेण सदा तस्मै नित्यश्रीर्नित्यमङ्गलम् ॥ ११ ॥

वात्स्यरामानुजेनेत्थं तैत्तिरीयमधीयता । रघुनन्दनसूरीणां मङ्गलं रचितं शुभम् ॥ १२ ॥